CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजतजयन्तीग्रन्थमाला-24

पण्डितराजजगन्नाथस्य प्रातिभं वैभवम्

कैलासपतित्रिपाठी

राष्ट्रिय-संस्कृत-संस्थानम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजतजयन्तीग्रन्थमाला-24

पण्डितराजजगन्नाथस्य प्रातिभं वैभवम्

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ★ Bharatiya Vidya

कैलासपतित्रिपाठी

श्री शंकराचार्य संस्कृत महाविद्यालय ★ भारतीय विद्या भवन, नई दिल्ली-1 ★
28-1-98

राष्ट्रियसंस्कृतसंस्थानम्

नईदिल्ली

१९९६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशकः
डॉ० कमलाकान्तमिश्रः,
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्
४०-ए, राजागार्डन, विशालएन्क्लेव
नई दिल्ली-११००२७

© राष्ट्रिय-संस्कृत-संस्थानम्

रजतजयन्तीग्रन्थमाला-25

प्रथमसंस्करणम्—१९९६

वि० सं० २०५३

मूल्यम् : रु० ५०/- रूप्यकाणि

अमर प्रिंटिंग प्रेस
दिल्ली-११०००९
दूरभाष : ७२५२३६२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राक्कथनम्

'योऽनूचानः स नो महान्' इत्युद्घोषानुरूपं संस्कृतस्य संरक्षण-संवर्द्धनाद्युद्देश्यं साधु निर्वहदिदं राष्ट्रियसंस्कृतसंस्थानं स्वीयं रजतजयन्तीं समपूरयदिति ज्ञात्वा समेषां विदुषां संस्कृतासक्तचित्तानाञ्च मनोऽवश्यं मोमुद्येत। प्राचीनशास्त्रीयपरम्परायाः संरक्षणे, तत्सम्बन्धियोजनानां कार्यान्वयने च संस्थानस्य योगदानं संस्कृतजगति सुविदितमेव।

उद्देश्यमिदम् अग्रेसारयितुकामा वयं राष्ट्रस्य लब्दप्रतिष्ठविद्वन्मूर्धन्यैर्विरचितैः ग्रन्थकुसुमैः रजतजयन्तीग्रन्थमालां निर्माय तत्रभवतां समक्षं प्रस्तूय नितरां सन्तोषमनुभवामः।

ग्रन्थोऽयं **पण्डितराजजगन्नाथस्य प्रातिभं वैभवम्** इति शीर्षकान्वितः पण्डितवरैः, साहित्यशास्त्रादिसमीक्षकत्वेन प्राप्तप्रतिष्ठैः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षैः, साहित्य-संस्कृति-संकाय-प्रमुखैः **डा॰ कैलासपतित्रिपाठि**भिर्विरचितः, पण्डितराजजगन्नाथस्य जीवनवृत्तं, तत्कृतीः, तदनितरसाधारण्यं वैभवञ्च विभावयति। अस्मदीयमनुरोधमङ्गीकृत्य ग्रन्थरत्नमिदं प्रणीतवद्भ्यः प्रो॰ त्रिपाठिमहोदयेभ्यः संस्थानं हार्दिकीं कृतज्ञतां ज्ञापयति।

रजतजयन्तीग्रन्थमालायाः प्रकाशनकार्येषु कृतभूरिपरिश्रमाः डा॰ सविता-पाठकः-डा॰ रा॰ देवनाथन्-डा॰ एम॰ चन्द्रशेखरन्-प्रभृतयः साधुवादभाजः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमरमुद्रणालयाधिकारिणः सश्रद्धं ग्रन्थमिमं मुद्रयित्वा विमोचनाय प्रस्तुतवन्त इति ते धन्यवादार्हाः ।

कमलाकान्तमिश्रः
निदेशकः
राष्ट्रियसंस्कृतसंस्थानम्

दिनाङ्कः २१-८-१९९६
नवदेहली

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyala
518

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रास्ताविकम्

पण्डितराजजगन्नाथः काव्यप्रणयने काव्यशास्त्रसमीक्षणे शास्त्रान्तरसमालोचने सर्वत्र च नवोन्मेषविधाने निरवद्यं निष्प्रत्यूहं निरुपमं च यशोधारयति । प्रस्तुतचिन्तने तस्य महामनीषिणः प्रातिभं वैभवमाकलयितुं कश्चिद् यत्नविशेषो विधीयते ।

पण्डितराजो न प्रस्थानं प्रवर्तयति, अपितु प्रभिन्नप्रस्थाने प्राञ्जलं किमपि नूतनं सहृदयग्राह्यं सर्वत्र समुन्मीलयति । सत्त्वप्रकृतिः पण्डितराजो न सहते परकृतां निकृतिम् । ये च तं न्यक्कर्तुं प्रचेष्टन्ते, तान् युक्त्या तथ्यस्पृशा वाचा प्रत्याचष्टे ।

अनया धिया प्रथमतस्तस्य विनयं, जन्मस्थानम्, विद्यावैभम्, आश्रयम्, प्रवादमथ तन्निर्मूलतां, भक्तिञ्च परिशीलयितुं यत्नः कृतः । तदग्रे तस्य यशो- वैजयन्तीस्वरूपस्य रसगंगाधरग्रन्थस्य किमपि यशोवैशिष्ट्यं विश्लेषयितुं प्रयासोऽनुष्ठितः । सत्स्वपि काव्यशास्त्राङ्गचिन्तनपरेषु ग्रन्थविशेषेषु रसगंगाधरस्य कोपयोगिता इति व्याख्यातुं चेष्टा कृता । काव्यप्रयोजनप्रस्तावे कीर्तिपरमाह्लादाभ्यां सह गुरुराजदेवताप्रसादादीनाम् उल्लेखः पण्डितराजस्य व्यक्तिगतं वैशिष्ट्यं कथं निरूपयति इत्यपि व्याख्यातुं विचेष्टितम् । कारणनिरूपणे च प्रतिभायाः स्वरूपं विविधपक्षतो व्याख्यातम् । अथ च केवलायाः प्रतिभायाः कारणत्वनिरूपणे पण्डितराजाशयं विशदीकर्तुं प्रयासो विहितः । काव्यस्वरूपनिरूपणे च **शब्यार्थौ काव्यम्** इति पक्षस्य समर्थकानां लक्षणान्याकलय्य पण्डितराजाभिमतं तद्वैशिष्ट्यञ्च निगलितम् । तदनन्तरं काव्यभेदनिरूपणे पण्डितराजदृष्टिं, तत्र विशकलितानां तथ्यानां दाक्ष्यम्, उदाहरणानां सौन्दर्यं, तृतीयकाव्यस्य मध्यमत्वम्, पञ्चमभेदस्य याथार्थ्योपपादनं तन्निराकरणमूलां च दृष्टिं, व्यश्लिक्षम् । एतदग्रे रसनिरूपणे यान्येकादशमतानि परिभाषितानि, तत्र पण्डितराजस्य किं भवितुमर्हति-इत्यपि दिङ्मात्रेण दर्शितम् ।

कैलासपतित्रिपाठी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूची

क्र.सं.	विषया:	पृ. सं.
१.	विनीतो जगन्नाथः	१
२.	जन्मस्थानम्	२
३.	विद्यावैभवम्	३
४.	आश्रयः	३
५.	प्रवादनिर्मूलता	४
६.	विधिविहितः पण्डितराजपरिणयः	५
७.	भगवद्भक्तः पण्डितराजः	६
८.	काव्यप्रयोजनम्	११
९.	कारणम्	१२
१०.	काव्यलक्षणम्	१४
११.	काव्यभेदः	१७
१२.	भेदानां लक्षणोदाहरणवैशिष्ट्यम्	१९
१३.	अप्पय्यदीक्षितव्याख्यानप्रत्याख्यानवैचित्र्यम्	२२
१४.	रसः	२५
१५.	अन्याः पण्डितराजकृतयः	२६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पण्डितराजजगन्नाथस्य प्रातिभं वैभवम्

केचन कवयन्ति। केचन च परीक्षन्ते शास्त्राणि। केचन वाक्यतत्त्वार्थबोधे वैशद्यं विद्योतयन्तश्चमत्कृतिं जनयन्ति। केचन कस्याञ्चिच्चिन्तनधारायां नवं पन्थानं संसृज्य प्रस्थानप्रवर्तका भवन्ति। केचन प्रवर्तिते प्रस्थाने मौलिकं किमप्युद्भावयन्ति।

पण्डितराजः प्रस्थानं प्रवर्तयति। किन्तु तदन्ये सर्वेऽपि सारस्वतवैभवभुवो गुणास्तस्मिन्नहमहमिकया विराजन्ते। प्रतिभावतां चिन्तनशीलानां मनीषिणां परम्परायामनितरसाधारणं ते संश्रयन्ति।

अत्यन्तं परिचितेऽपि वस्तुनि, परिशीलितेऽपि तथ्ये, समाम्नातचरेऽपि राद्धान्ते विच्छित्तिमञ्जुलं किमपि भास्वरं तत्त्वं ते समाविर्भावयन्ति।

विनीतो जगन्नाथः

ते सन्ति सर्वथा विनीताः। तेषां विनयो दृश्यते गङ्गालहरी, करुणालहरी प्रभृतिपद्येषु। किन्तु ये केचन पण्डितराजमीर्ष्यया अधिक्षिपन्ति तान् न सहते पण्डितराजः। तेषामेव कृते क्वचित् सिंहस्वनमपि प्रकटयति—

आमूलाद्राजसानोर्मलयवलयितादाचकूलात्पयोधेः,
यावन्तः सन्ति काव्यप्रणयनपटवस्ते विशङ्कं वदन्तु।
मृद्वीकापाकनिर्यन्मसृणरसभरीमाधुरीभाग्यभाजां
वाचामाचार्यतायाः पदमनुभवितुं कोऽस्ति धन्यो मदन्यः॥

पण्डितराजकाव्यसंग्रहे पृ० ७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्वचित् पण्डितराज आत्मानं प्रायश्चित्तप्रसरणपथातीतचरितं मनुते। क्वचिच्च एवंविधां गर्वोक्तिं प्रकाशयति। अत्र नूनं केनापि हेतुना भवितव्यम्। अत्र पराधिक्षेपह्रतिजन्या स्वाभिमानज्वालाभिव्यक्तिः स्फुटा प्रतीयते। परन्त्वत्र किमप्यस्वाभाविकं नास्ति। गर्वोक्तिरपि यदि याथार्थ्यं भजते तदा तदीयामर्षकषायता स्वतः परिक्षीणा भवति।

अन्यत्रापि कञ्चित् कविं प्रति प्रकाशिता काचिदुक्तिः गर्वपरीतेव विभाति—

निर्माणे यदि मार्मिकोसि नितरामत्यन्तपाकद्रव-
न्मृद्वीकामधुमाधुरीमदपरीवाहोद्धराणां गिराम्।
काव्यं तर्हि सखे सुखेन कथय त्वं सम्मुखे मादृशां
नो चेद्दुष्कृतमात्मना कृतमिव स्वान्ताद्बहिर्मा कृथाः॥

पण्डितराजकाव्यसंग्रहे पृ० ७८

इयं नास्ति गर्वोक्तिः। येषां सहजा मृद्वीका पाकसम्मिता मधुमयी वाक् सहजं परिस्फुरति, ते न श्रद्दधते परेषां क्लेशप्रकाशिताम् अनास्वाद्यां वाचं श्रोतुम्। ते उद्विजन्ते तादृग्वचोभ्यः।

जन्मस्थानम्

पण्डितराजः कुत्रजातः, कदा वा जात इति याथातथ्येन वक्तुं न शक्यम्। अयमासीत् त्रिलिङ्गब्राह्मणः कोणसीमास्थानस्य। आन्ध्रप्रदेशस्य पूर्वगोदावरीजनपदे इदं स्थानं समापतति। केचिद्वदन्ति यत् पण्डितराजः गुण्टूरजनपदस्य तेनालीप्रखण्डे दाउनूरूग्रामे अजनि। इदं सर्वमनुमानं तदीयां कुलपरम्परामनुरुध्य वर्तते। येषां कुलस्य उपद्रष्टोपाधिराशिः, उपद्रष्टोपाधिधारिणो ब्राह्मणाः 'गुण्टूर' जनपदे पूर्वगोदावरी जनपदे च प्राप्यन्ते। प्रतीयते गुण्टूरजनपदात् पूर्वगोदावरीजनपदं तपस्विनः पण्डितराजपूर्वजाः पुण्यसलिलां गोदावरीं गताः भवेयुः। किन्तु पण्डितराजस्य कीर्तिवैजयन्तीप्रतिमे रसगंगाधरग्रन्थे पण्डितराजपितुः पेरुभट्टस्य वाराणस्यामवस्थितिः प्रमाणिता भवति। वाराणस्यां त्रिलिङ्ग(तैलंग)विप्रवंशजाः अद्यापि कृतवसतयो विराजन्ते। एवं कल्पयितुं शक्यते यद् गुण्टूरादिष्टगोदावरीं ततश्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाराणसीमागता भवेयुः पण्डितराजपूर्वजाः । एवं पण्डितराजस्य जन्मभूमिः अथ च विद्याभूमिः वाराणसी तथा च कर्मभूमिः जयपुरम्, दिल्लीनगरं, मधुपुरी(मथुरा), असमप्रदेशः, नेपालभूमिः अन्ते पुनर्वारणसी इति ।

विद्यावैभवम्

पण्डितराजपितुः गुरव आसन् ज्ञानेन्द्रभिक्षुः, श्रीमहेन्द्रः, श्रीखण्डदेवः, अथ च शेषवीरेश्वरः ।

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः ॥

रसगंगाधरे पृ० ८

अस्य पिता पेरुभट्टः सर्वविद्याधरः आसीत् । अयं चापि पितुराशिषा सर्वविद्याधरत्वमध्यगच्छत् । पेरुभट्टः पाषाणादपि पीयूषं निष्यन्दयति स्म । पण्डितराजोऽपि सर्वथा पितरमनुहरति । अयं काणादीम् आक्षपादीञ्च वाचं तलस्पर्शिना पाण्डित्येन विशदयति, प्रकटयति च निरवद्यां वैपश्चितीं ब्रह्मविद्याप्रपञ्चे, गभीरतयाऽवगाहते जैमिनीयं शासनं, शब्दविद्यायामपि व्यनक्ति गाढं परिशीलनम् । एवं पदवाक्यप्रमाणशास्त्रेषु पारङ्गतः पण्डितराजः मृद्वीकापाकमसृणां वाचं संसृजति सर्वत्र काव्ये शास्त्रे च ।

आश्रयः

अस्य तारुण्यं शाहजहांसम्राजः शासनसमये व्यत्यगात् । उक्तञ्च—

दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः ।
अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शाहजहांसम्राजः शासनकालः १६२८ ई०-१६५८ ई० मन्यते। १६५८ ई० वर्षे तत्तनयेन औरङ्गजेबसम्राजा स कारागारे निक्षिप्तः १६६६ ई० वर्षे अस्य निधनमभूत्। **पण्डितराजजीवितमु** इत्यस्त्येकः तेलुगुग्रन्थः। तद्दिशा पण्डितराजस्य जन्मसमयः १६०० ई० वर्ष आसीत्। १६२५ ई० वर्षं यावत् स विद्यामधीतवान्। तदनन्तरं राज्ञामाश्रयमधिगन्तुं स प्रायतत। सन्ति काश्चन दन्तकथाश्चाप्यत्र यत् प्रथमं पण्डितराजः जयपुरनगरं गतवान्। तत्र काञ्चित् पाठशालां प्रतिष्ठापितवान्। तत्रैव दिल्लीशासनसम्बद्धः कश्चन ईस्लामविद्यानदीष्णः यवनधर्मशास्त्री समागमत्। स च जगन्नाथप्रतिभया नितान्तं चमत्कृतः प्रसन्नश्च सम्राजं न्यवेदयत्। तत्प्रयत्नेनैव दिल्लीश्वरस्य प्रसादाश्रयोऽभवत्। पण्डितराजपदवी तेन सम्राट्शाहजहांतो लब्धा। तद्यथोक्तं पण्डितराजकाव्यसंग्रहे—

श्रीसार्वभौमसाहिजहानप्रसादाधिगतपण्डितरायपदवीविराजितेन।

पृ० ८५

प्रचलितेषु बहुषु मतेषु इतिहासविदो वदन्ति यत् यदा औरङ्गजेबनृपतिना सम्राट्शाहजहां कारागारे निक्षिप्तः, तदा पण्डितराजः असमप्रदेशम् आगतवान्। यत्रासीत् शासकः **प्राणनारायणः**। असमप्रदेशे (१६३३-१६६६ ई) कालः स्वर्णसमयः प्रोच्यते। मुगलशासने राजाश्रये वर्तमानः पण्डितराजः **दाराशिकोहस्य** शाहजहां-ज्येष्ठतनयस्य अत्यन्तं प्रियः आसीत्। अथ च नूरजहांभर्तुः **आसफखान**स्य चापि श्रद्धाभाजनमासीत्।

प्रवादनिर्मूलता

पण्डितराजः स्वीयेन मौलिकेन बुद्धिवैभवेन अद्भुतं सम्मानसौविध्यनिवहं शासनादधिगत्य तदानींतनमनीषिणामीर्ष्याभाजनम् अभवत्। अयं यवनीसंस्पर्शदूषित इति प्रवादमपि प्राचीचरन् पारंपरीणाः पण्डिताः। किन्त्वेतत्सर्वमसङ्गतम्, यदि कश्चित् कविः कांचिल्ललनामधिकृत्य यदि कवते तेनेदं न शंकनीयः यदस्य कवयितुः सम्पर्कः अनया साकं वर्तते। अस्मिन् प्रसङ्गे कानिचित् पद्यान्युदि्ध्रयन्ते—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न याचे गजालिं न वा वाजिराजिं
न वित्तेषु चित्तं मदीयं कदाचित्।
इयं सुस्तनी मस्तकन्यस्तहस्ता
लवङ्गी कुरङ्गी दृगङ्गीकरोतु ।।

इति पद्यमधिकृत्य विद्वांसो वदन्ति यल्लवङ्गीनाम्नी आसीद् काचिद् यवनकन्या। तया सह संपृक्तो जातः पण्डितराजः। किन्तु धारणैषा नास्ति समीचीना। यतो हि पद्यमिदं रसगंगाधरादिजगन्नाथप्रथितग्रन्थेषु नोपलभ्यते। पण्डितराजनाम्ना सुभाषितसंग्रहेषु पद्यमिदं प्राप्यते। अस्य पद्यस्य यादृशी पदशय्या, यादृशं वा छन्दोविधानं यादृशश्च भाषाप्रवाहः, तैरिदं वक्तुं शक्यते यत् पद्यमिदं पण्डितराजस्य। किन्तु वर्णनमात्रेण सम्पर्कविशेषकल्पना दूरानुधाविनीव प्रतीयते, अन्यच्च इदमवधेयं 'लवङ्गी' इति नाम यवनसम्प्रदाये न भवति। यवनकन्यानां नामविधानम् अन्यादृशमिव भवति। अतोऽस्य पद्यस्य वर्ण्यवस्तुरूपा लवङ्गी यवनकन्या नासीदिति सम्यक् प्रतीयते। अत इदं निष्कृष्यते यद् यवनीसम्पर्कदूषणसम्भावना असूयामूलैव।

यवनी नवनीतकोमलाङ्गी इत्यादिपद्यानि च पण्डितराजप्रमुखग्रन्थेषु न प्राप्यन्ते।

विधिविहितः पण्डितराजपरिणयः

*भामिणीविलास*टीकाकर्ता **श्रीमदच्युतरायः** मनुते यत् पण्डितराजः नासीद् विधिवद्विवाहितः। (भामिनीविलासें पृ० ६३)।

किन्त्विदं चिन्त्यम्। यतो हि **करुणविलासे** कानिचित् पद्यानि प्राप्यन्ते, येन स्पष्टं प्रतीयते यत् पण्डितराजस्य सनातनधर्मविधिना विवाहसंस्कारः समपद्यत। यत्र अश्मारोहणादिविधीनां चर्चा विद्यते। एवं च धर्मशास्त्रीयविधिना परिगृहीतायाः तत्पत्न्याः नाम **कामेश्वरी** आसीत्। तेलुगुपरम्परायां कामेश्वरीति नाम प्राचुर्येण कन्याजनानां विधीयते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृत्वा पदस्खलनभीतिवशात् करं मे
याऽऽरूढवत्यसि शिलाशकलं विवाहे।
सा मां विहाय कथमद्य विलासिनी द्या-
मारोहतीति हृदयं शतधा प्रयाति॥

मन्दस्मितेन सुधया परिषिच्य या मां
नेत्रोत्पलैर्विकसितैरनिशं समीजे।
सा नित्यमङ्गलमयी गृहदेवता मे
कामेश्वरी हृदयतो दयिता न याति॥

पण्डितराजकाव्यसंग्रहे पृ० ६९-७०

महादेवसूरी यः स्वयमात्मानं पण्डितराजस्य वंशजं मनुते, सः—

याते च सम्प्रति दिने प्रतिबन्धरत्ने इति **करुणविलास**पद्यव्याख्याने वदति— 'गृहिण्यां दिवं प्रतियाते, मृतायां सत्याम्'। एतेन तत्परिणयः, एवं च धर्मपत्न्याः तिरोधानम्, उभयं व्यक्तं भवति। अग्रे च **करुणविलासस्य** द्वादशे पद्ये—

नित्यमङ्गलमयी गृहदेवता मे इत्यस्य व्याख्यानं क्रियते—नित्यमङ्गलः पुत्रपौत्राद्युत्सवः, तत्प्रचुरा नित्यमङ्गलमयी गृहदेवता कामेश्वरी। (पण्डितराजजीवितमु पृ० ४२)

एतैरिदं सर्वथा प्रमितं भवति यत् पण्डितराजस्य आसीत् वैदिकेन विधिना परिणीता काचित् धर्मपत्नी।

भगवद्भक्तः पण्डितराजः

पण्डितराजो महान् भक्तः। 'भगवति कृष्णे' तदीया काचित् परानुरक्तिः। रसगङ्गाधरस्य मङ्गलपद्ये सर्वरसाधिष्ठानं भगवन्तम् कृष्णम् श्रद्धया स्मरति पण्डितराजः। मध्ये रसगङ्गाधरमपि भूयांसि सन्ति पद्यानि यानि भगवद्भक्तिद्योतकानि सन्ति। ईदृशं निरवद्यं विद्यावैभवम्, ईदृशी च भगवदनुरक्तिः, ईदृशी च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विलक्षणा प्रतिभा पण्डितराजस्य चरित्रगतां निरवद्यतां द्योतयन्ति। न हि सावद्ये चरित्रे निरवद्या विद्या भवति स्फुरिता।

शृङ्गाररसपेशलानि पण्डितराजपद्यानि तत्प्रतिभावैभवं व्यञ्जयन्ति, नहि चरित्रगतं दौर्बल्यम्। अतो यवनीसम्पर्कदूषणकथा वृथैव भाति।

अप्पय्यदीक्षितमधिकृत्य तत्सिद्धान्तप्रत्याख्यानमूलानि कानिचित् प्रकरणानि प्राप्यन्ते। तैः पण्डितराजस्य दुर्विनयमूला काचन प्रकृतिर्न कल्पनीया। यतो हि सत्त्वमूला प्रकृतिः स्वल्पीयसाप्यधिक्षेपेण प्रज्वलिता भवति। यथोक्तं **कालिदासेन**—

> **स्पर्शानुकूला अपि सूर्यकान्तस्—**
> **तदन्यतेजोविभवाद्दहन्ति।**

शान्तः सौम्यस्वभावः माधुर्यमसृणः पण्डितराजः अप्पय्यदीक्षितादीनाम् अवज्ञामूलैरधिक्षेपैः व्यथितः सन् स्वाक्रोशं क्वचित् क्वचित् अभिव्यनक्ति। मुनयोपि कुप्यन्त्यधिक्षैपैः। पण्डितराजो लब्धराजवरप्रसादो निरवद्यविद्यः कथमिव सहतां कस्याप्यधिक्षेपम्। अतः कञ्चिद् व्यक्तिविशेषं निमित्तीकृत्य ये केचन आक्रोशाः पण्डितराजेन व्यक्ताः तत्र हेतुता अवज्ञायाः, न तु प्रकृतेः स्वभावस्य वा। वह्निसंयोगेन शीतप्रकृतिजलं दहति; किन्तु दाहस्तस्य न गुणः स्वभावो वा। एवमेव परकृतोद्वेजकनिन्दावह्नियोगेन मधुर-प्रकृतिः पण्डितराजोऽमर्षभाषया भाषते।

एवं विधेन, सच्चारित्र्येण सौम्यप्रकृत्या विभूषितो जगन्नाथपण्डितनरेन्द्रः न धत्ते केनापि साकं सहजं शात्रवम्।

ईश्वरे परानुरक्तिरूपां भक्तिं धारयन् पण्डितराजो भक्तिरसं विश्लेष्यन् भक्तये काञ्चिद् विशिष्टां श्रद्धां व्यनक्ति।

भगवद्गुणवर्णनाकर्णनद्रुतस्वान्ते भक्ते याऽनुभूतिस्तत्र भक्तिरसत्वं कथन्नाङ्गीक्रियत इत्यत्र पण्जितराज आशेते यन्मुनिवचनभङ्गवैयाकुलीभावप्रसङ्ग आपतति। यतो हि **भरतमुनिना** प्रोक्तं तथा च **काव्यप्रकाशादिग्रन्थेषू**दाहृतञ्च—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टावेव रसा नाट्ये.... ॥
शान्तोऽपि नवमो रसः ॥

अस्यां स्थितौ यदि भक्तिरपि रसः स्यात्तदा नवत्वगणना भज्येत। एतेनेदं निष्कृष्यते यद् भक्तेः रसत्वं पण्डितराजस्याभिमतम्। तद्घोषणायां मुनिवचनमेव बाधकम्। भगवति श्रीकृष्णे जगन्नाथस्य विशिष्टा रतिः। अम्बुदसब्रह्मचारिणी श्रीकृष्णस्य मूर्त्तिः पण्डितराजस्य समाराध्या। नदीषु गङ्गा, देवविग्रहेषु श्रीकृष्णः तत्प्रियौ।

मङ्गलपद्ये कादम्बिनीत्वेनाध्यवसिता श्रीकृष्णमूर्तिः तच्चित्तभूमिरञ्जनी। रसगङ्गाधरे समुद्धृतेषु करुणालहरीपद्यमेकम् अस्मिन्नंशे द्रष्टव्यम्—

सुरस्रोतस्विन्याः पुलिनमधितिष्ठन् नयनयो-
र्विधायान्तर्मुद्रामथ सपदि विद्राव्य विषयान्।
विधूतान्तर्ध्वान्तो मधुरमधुरायां चिति कदा,
निमग्नः स्यां कस्यांचन नवनभस्याम्बुदरुचि।

रसगङ्गाधरे पृ० १४४

गाङ्गं पुलिनमधिष्ठाय, विषयान् विद्राव्य, नयने निमील्य, अन्तस्तिमिरं विधूय, अन्तर्मुद्रां संसृज्य सुमधुरायां चिति नवभाद्रमासीयनीरदकान्तौ भगवति श्रीकृष्णे निमग्नो भवेयमिति कवेः काङ्क्षितम्। एतत्पद्ये टिप्पणीं कुर्वन् पण्डितराजो व्याहरति—

इदं च पद्यं मन्निर्मितायां भगवत्भक्तिप्रधानायां करुणालहर्यामुपनिबद्धमिति तत्प्रधानभावप्राधान्यमेवार्हति। (पृ० १४५)

एतेन पण्जितराजस्य चित्तभित्तौ कृष्णमूर्तेरभिषेको व्यज्यते।

न केवलं भगवति कृष्णे अपितु तद्वाहने गरुडेऽपि महती प्रीतिः सन्दृश्यतेऽस्य महामनीषिणः। वीररसस्य विविधभेदप्रदर्शनप्रस्तावे वैनतेयः वासवं वदति—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय।
अहमिह पुरुहुत! पक्षकोणे, निखिलमिदं जगदण्डकं वहामि॥

अर्थात् शेषनागः इमां धरित्रीं स्वशिरसः अवतारयतु। भगवान् कच्छपोऽपि परित्यजतु धरित्रीम्, अनुभवतु च सुखम्। हे पुरुहूत! शक्र! अहं निखिलं ब्रह्माण्डं स्वपक्षकोणे आज्ञा स्येन वक्ष्यामि। अत्र भगवतो गरुडस्य बलविषयकं लोकोत्तर-मैश्वर्यं वर्णयन् पण्डितराजो वैष्णवीं भक्तिं व्यनक्ति।

भगवदनुग्रहात् पण्डितराजजगन्नाथेन काव्यप्रणयनपाटवेन सह शास्त्रावगा-हनक्षमतापि लोकोत्तरविग्रहात्मिका लब्धा। तदीयो **रसगंगाधरग्रन्थः** सहृदयहृदया-न्तर्ध्वान्तं हरति। यथोक्तम्—

निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं,
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः।
हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवताम्
अलङ्कारान् सर्वानपि गलितगर्वान् रचयतु॥

परिष्कुर्वन्त्वर्थान् सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता।
तिमीन्द्राः सङ्क्षोभं विदधतु पयोधेः पुनरिमे,
किमेतेनायासो भवति विफलो मन्दरगिरेः।

एतेनेदमाशयितुं शक्यते यत् काव्यसिद्धान्तविषये काश्चन धारणाः पुनः परिष्करणीया आसन्। काव्यस्वरूपकारणप्रयोजनगुणदोषालङ्कारप्रभृतिविषयेषु प्रचलितराद्धान्तेषु बहुत्र संशोधनं नान्तरीयकमासीत्। यद्यपि **पण्डितराजो** ब्रूते—

मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम्॥

(पृ० ७)

अर्थात् रसगंगाधरप्रणयनार्थं बहूनि शास्त्राणि तेन परिशीलितानि। तदनन्त-रञ्च रसगंगाधरनाम्नी काव्यमीमांसा कुतूहलेन कृता।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वं प्रोक्तं **निमग्नेन क्लेशैः मननजलधेरन्तरुदरम्**। अग्रे चोच्यते-**करोति कुतुकेन काव्यमीमांसाम्** इति क्लेश-कुतुकयोः महती विप्रतिषिद्धता। अत्रेदं प्रतीयते यत् यः मननतरितीर्णविधार्णवः, यश्च करतलामलकीकृतशास्त्रतत्त्वार्थः, तस्य कृते विच्छितिप्रचुरं चिन्तनं सहजमिव भवति। किन्तु समाम्नातपूर्वतत्त्वार्थेषु परिशीलितानेकविद्वत्सु नवार्थोपस्थापनं क्लेशसाध्यं भवति। अतएव पूर्वतने पद्ये **निमग्नेन क्लेशैरि**त्युच्यते, परस्ताच्च **करोति कुतुकेन काव्यमीमांसाम्** इत्युच्यते।

अत्रेदमपि विभावयितुं शक्यते यद् रसगंगाधरे केचन केचनांशाः शास्त्रान्तर-परिशीलनमूलाः विशदाः सन्तोऽपि प्रज्ञायाः सूक्ष्मतामपेक्षन्ते। केचन च अनायास-बुद्ध्या विच्छित्तिभाजः। चित्तवृत्तिं प्रसादयन्तः, कुतुकाय भवन्ति सहृदयानाम्। अनेन विधिना क्लेशकुतुकयोर्व्यवस्था पण्डितराजेन व्यधायि।

पण्डितराजेन तदेव विमृष्टं यदन्यैर्व्यमर्शि, त एव विषया गृहीता यदन्यैरग्रा-हिषत। अस्यां स्थितौ का तदीया नवता ? प्रश्नमेनं समाधत्ते **पण्डितनरेन्द्रः—**

परिष्कुर्वन्त्वर्थान्नित्यादिना। पयोधौ तिमीन्द्राः महाकायाः बम्भ्रम्यमाणाः जनयन्ति संक्षोभम्, किन्तु तेषां सञ्चरणक्षोभेण नाविर्भवन्ति रत्नानि, न चाप्युन्मीलितो भवति पीयूषकलशः। तदर्थं तु मन्दरमन्थदण्डः एव कृतित्वमासादयति। एवं सहृदयधु-रीणाः काव्यतत्त्वार्थं महता कालेन सूक्ष्मतया परीक्षन्ते। तानेवार्थान् पण्डितराजोऽपि समीक्षते। तत्र स एव भेदो योऽस्ति मन्दर-तिमीन्द्रयोः।

एकोऽपरः पक्षः पण्डितराजप्रतिभाया अस्ति तदीयमुदाहरणानुरूपं काव्यं यच्च तेन रचितं न कुतश्चित् गृहीतम्। मृगमदप्रसूनामोदयोर्यथा भेदो भवति तथैव भेदो विद्यते पण्डितराज-तदितरकाव्ययोः। कस्तूरिकाजननशक्तिसम्भृतो मृगो यथा प्रसूनामोदमाघ्रातुं मनसापि न चेष्टते तथैव पण्डितराजेनान्यकृतोदाहरणगवेषणार्थं कश्चित् यत्नः कृतः। रसगङ्गाधरे एते त्रयोऽपि पक्षाः प्राप्यन्ते।

(१) क्लेशैर्मननजलधौ निमज्जनं मननतरिसाहाय्येन विद्यार्णवतरणं वा।

(२) कुतुकेन काव्यमीमांसनम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(३) उदाहरणानुरूपं कस्तूरिकामोदमञ्जुलं काव्यम् ।

मननजलधिनिमज्जनाका रसगङ्गाधरमणिरसौ पण्डितनरेन्द्रः शास्त्रकाव्यप्रणयनानितरसाधारणकीर्तिः गुणवतां हृदये धारणाय बहूनां रत्नानामुन्मीलनं करोति । तेषु कानिचित् प्रेक्षणीयानि सन्ति । अस्मिन् विवेचने केषाञ्चित् सिद्धान्तानां कासाञ्चित् पङ्क्तीनाञ्च विवेचनं करिष्यते । तत्र सिद्धान्तेषु या नवता तत्र प्रथमतो दृष्टिपातो विधीयते ।

काव्यप्रयोजनम्—

कीर्ति-परमाह्लाद-गुरु-राज-देवता-प्रसादादीनि तत्त्वानि पण्डितराजः काव्यप्रयोजनत्वेनाङ्गीकरोति । अत्र यशोऽधिगतिः, अर्थावाप्तिः, व्यवहारावेदनम्, प्रत्यूहध्वंसः, रसप्रधानोपदेशयोजनम्, सद्यः परनिर्वृत्तिः काव्यप्रयोजनमिति केचन मन्वते । केचन च सुखेण धर्मार्थकाममोक्षाधिगतिं काव्यप्रयोजनमुररीकुर्वन्ति ।

अत्र **पण्डितराजो** न कञ्चित् प्रत्याचष्टे न वा किञ्चिदत्र विशिष्टं विश्लेषणं प्रस्तौति । प्रतीयते तज्जीवने यत्किञ्चिद्घटितं तदनुसृत्य प्रयोजनचर्चा तेन कृता । प्रथमतस्तु कवयः कीर्तये प्रवर्तन्ते । एतावता कीर्तेरत्र प्राथम्यम् । परमाह्लादोप्येकं प्रयोजनम् प्रामुख्यञ्चास्य । अन्यैरपि प्रयोजनस्यास्य महत्त्वमङ्गीकृतम् । अनयोः प्रयोजनयोः स्वीकरणं पारम्परिकम् । किन्तु पण्डितराजदृशा यत्काव्यप्रयोजनम्, तज्जीवने घटितम्, तदुल्लेखं स परस्तात् करोति । गुरुराजदेवताप्रसादादिं चापि स प्रयोजनं मनुते । पण्डितराजजीवने एषां त्रयाणां पदार्थनामस्ति भूयिष्ठं महत्त्वम् । अस्य गुरुः **श्रीमान् पेरुभट्टः** सर्वविद्याधरत्वेन सह सरसोऽप्यासीत् । अत एव **पण्डितराजेनोच्यते—**

पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं जगद्गुरुम् ॥

श्लेषेण अत्र भगवान् कृष्णोऽपि बुबोधयिषितः—**कृष्णं वन्दे जगद्गुरुम्** इतिवत् । **लक्ष्मीः** अस्य जननी, जनकश्च **पेरुभट्टः** । आसीत् तस्मिन् जगद्गुरुत्वम् । यतो हि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदीयाध्यापने, प्रवचने, व्यवहारे च, काचिन्महती सरसता, प्रथिताऽऽसीत् । तल्लीलया पाषाणादपि पीयूषं स्यन्दते स्म । अयमासीत् पण्डितराजस्य महागुरुः । मन्ये पुत्रस्य माधुर्यप्रवणवचनरचनां प्रेक्ष्य नितान्तं प्रसन्नो महागुरुः स्वप्रसादेन अन्वग्रहीत् तनयम् । राजप्रसादश्च तत्कृते प्रथित एव । परमरमणीया तदीया काव्यरचना । महाप्रसादं तस्मै प्रादात् । देवतायामपि पण्डितराजस्य सान्द्रा श्रद्धा । सुरस्रोतस्विनी तथा च करूणावरुणालयो भगवान् कृष्णस्तदाराध्यौ । **मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी** इत्यनेन कविः कामयते यन्मधुरमधुरायां ममि चित सर्वरसनिकेतनो भगवान् प्रतिष्ठितो भवतु । सति प्रतिष्ठिते तस्मिन् देवदेवे आराधकोऽपि रसमयो भवति । तदैव रसरूपायाः गङ्गायाः धारणप्रस्रवणक्षमता तस्मिन्नाञ्जस्येन विकसिता भवति । एवं गुरु-राज-देवता-प्रसादानां काव्यप्रयोजने पण्डितराजदृशा विशेषमाहात्म्यमस्ति । आदि पदेन तान्यपि वस्तूनि प्रयोजनत्वेनाङ्गीकृतानि, यानि अन्यैः प्रयोजनत्वेन परिभाषितानि । अर्थात् प्रयोजनान्तराणां प्रत्याख्यानं विनैव गुरुराजदेवताप्रसादानां संश्लेषणं प्रयोजननिरूपणे कृतम् ।

कारणम्

कैश्चित् काव्यकारणत्वेन प्रख्योपाख्याप्रसरादीनां वैशिष्ट्यमङ्गीकृतम् । कैश्चिच्च शक्तिनिपुणताभ्यासानां प्रयोजनत्वमङ्गीकृतम् । तत्र **पण्डितराजो** विप्रतिपद्यते । तद्दृशा काव्यं प्रति प्रतिभायाः कारणता, प्रतिभां प्रति च व्युत्पत्त्यभ्यासजननान्तरसंस्कारादीनां कारणत्वं भवेन्नाम । **मम्मटस्य** काव्यहेतुनिरूपणं सर्वथा प्रथितम्, किन्तु तत्रापि **पण्डितराजः** कामपि नवतामुत्पादयति केवलायाः प्रतिभायाः कारणत्वमङ्गीकृत्य । काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभात्वेनाङ्गीकृता । कवित्वस्य बीजं प्रतिभानम्, **नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा** इत्यपि कैश्चिदुच्यते ।

प्रतिभां व्याकुर्वन्त आचार्याः स्मृत्यादीन् व्याचक्षते । तद्यथा **सम्प्रदाय-प्रकाशिन्याम्**—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मृतिर्व्यतीतविषया मतिरागामिगोचरा
बुद्धिस्तात्कालिकी ज्ञेया प्रज्ञा त्रैकालिकी मता।
प्रज्ञां नवनवोन्मेषशालिनीं प्रतिभां विदुः ॥
द्वे वर्त्मनी गिरां देव्याः शास्त्रञ्च कविकर्म च।
प्रज्ञोपज्ञं तयोराद्यं प्रतिभोद्भवमन्तिमम् ॥

(काव्यप्रकाशे पृ-४)

स्मृतिरतीतकालिकी भवति। मतिर्भविष्यत्कालिकी भवति। बुद्धिः वर्तमानकालिकी भवति। प्रज्ञा त्रैकालिकी भवति। यदा च प्रज्ञा नवनवोन्मेषैः सहजतया शालते, तदा सा प्रतिभा कथ्यते। वाचामधिदेवतायाः द्वौ मार्गौ स्तः—शास्त्रम् अथ च काव्यम्। शास्त्रं प्रज्ञोपज्ञं भवति, अथ च काव्यं प्रतिभया उद्भूतं भवति। यथा भट्टतौतेन उक्तम्—

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।

महामाहेश्वरेण अभिनवगुप्तपादेन प्रोक्तम्—प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा। तस्याः विशेषो रसावेक्षवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम्। (लोच० पृ ९२)।

प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्। (लोचने पृ० ३१७)।

यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम् ॥

(लोचने पृ० ११४)

मम्मटेनाप्युक्तम्—शक्तिः कवित्वबीजरूपः संस्कारविशेषः। (काव्यप्रकाशे पृ० ८)

यथा च वाग्भटेनोक्तम्—

प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनी।
स्फुरन्ति सत्कवेर्बुद्धिः प्रतिभा सर्वतोमुखी ॥

(वाग्भटालंकार पृ० ४)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राजशेखरेण उक्तम्—

या शब्दग्राममर्थसार्थमलंकारतन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति, सा प्रतिभा।

(काव्यमीमांसायां पृ० ६)

महिमभट्टेन उक्तम्—

रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः
क्षणं स्वरूपस्पर्शोत्था प्रज्ञैव प्रतिभा कवेः ॥

सा हि चक्षुर्भगवतः तृतीयमितिगीयते
येन साक्षात्करोत्येष भावांस्त्रैलोक्यवर्तिनः ॥

व्यक्तिविवेके पृ० ४५८-५३१

कुन्तकेनोक्तम्—प्राक्तनाद्यतनसंस्कारप्रौढा प्रतिभा काचिदेव कवि-शक्तिः

(वक्रोक्तिजीविते पृ० १०७)

इत्थं प्रतिभायाः स्वरूपं वैशिष्ट्यञ्च पुरातनैराचार्यैर्व्याकृतम्। प्रायेण सर्वेऽप्याचार्याः व्युत्पत्त्यभ्यासापेक्षया प्रतिभायाः काव्यनिर्माणे हेतुत्वमङ्गीकुर्वन्ति। एनामेव प्रतिभां पण्डितराजः काव्यकारणं मनुते। तथा च प्रतिभां प्रति व्युत्पत्त्यादीनां कारणता कल्पिता।

काव्यलक्षणम्

काव्यस्वरूपनिर्माणे बहवोऽप्याचार्याः स्वाभिमतं प्रकाशयन्ति। शब्दार्थौ काव्यम्, शब्दो वा काव्यम् इत्यत्र परस्परं प्रविभक्तमाचार्याणां दलद्वयं विद्यते। तत्र शब्दार्थौ काव्यम् इत्यत्र आचार्या सन्ति—

१. शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा

—भामहः १.१६

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२. काव्यशब्दोऽयं गुणालंकारसंस्कृतयोः शब्दार्थयोर्वर्तते

—वामनः १.१

३. शब्दार्थौ काव्यम्

—रुद्रटः काव्यालंकारे २.१

४. अदोषौ सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्

—हेमचन्द्रः पृ १६

५. शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ च काव्यम्—

—वाग्भट्टः पृ० १४

६. गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ

—विद्यानाथः प्रतापरुद्रयशोभूषणे पृ ४२

७. शब्दार्थौ बहुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनि

—विद्याधरः, एकावल्याम् पृ० १,१३

८. तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि

—मम्मटः, काव्यप्रकाशे पृ ११९

९. शब्दार्थौ ते शरीरम् संस्कृतं मुखं प्राकृतं बाहू,
जघनमपभ्रंशः, पैशाचं पादौ, उरोर्मिश्रम्

—राजेशेखरः, काव्यमीमांसायाम् पृ० १३

१०. शब्दार्थौ सहितौ वक्रकविव्यापारशालिनी।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी॥

—वक्रोक्तिजीविते १

शब्दार्थयोः साहित्यं कीदृशं स्यादिति विश्लेषयन् कुन्तको वदति—

शब्दार्थौ सहितावेव प्रतीतौ स्फुरतः सदा।
सहिताविति तावेव किमपूर्वं विधीयते॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ॥

एवं **शब्दार्थौ काव्यम्** इति वादिनामस्ति भूयसी संख्या । कतिचन आचार्याः **शब्दः काव्यम्** इति पक्षे श्रद्दधते । तद्यथा—

१. शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली

— दण्डी, काव्यादर्शे १,९

२. वाक्यं रसात्मकं काव्यम्

—विश्वनाथः, साहित्यदर्पणे—३

३. रमणीयार्थप्रतिपादकः शब्दः काव्यम्

—पंडितराजजगन्नाथः, रसगंगाधरे पृ० ९

इत्थं **पदावली काव्यम्, वाक्यं काव्यम्, शब्दः काव्यम्** इति वदन्त आचार्याः काव्यस्य प्रवृत्तिनिमित्तं शब्दं मन्यन्ते ।

वस्तुतः कस्यापि शब्दस्य अर्थनिर्धारणाय तदीया व्युत्पत्तिः प्रयोगप्रवाहो वा सहायकत्वेन गृह्यते । *कबृवर्णने* इत्यस्माद् धातोः काव्यशब्दस्य निष्पत्तिं केचन मन्यन्ते । किन्तु 'कबृ' इत्यत्र बकारस्य सद्भावात् वकारस्य च अभावात् धातुमेनं काव्यव्युत्पत्तये न गृह्णन्ति । ते *कूङ्-शब्दे* इत्यस्माद्धातोः कविशब्दं, काव्यशब्दं वा निष्पादयन्ति । अर्थात् कवते शब्दं करोति—इति कविः, कवेः कर्म काव्यम् इति ष्यंञ्प्रत्यये कृते सिद्धयति । *कबृवर्णने* इत्यस्माद्धातोरपि यदि काव्यशब्दः निष्पाद्यते, तदा वबयोरभेदात् इति नियममाश्रित्य बकारस्थाने वकारोच्चारणमसङ्गतं न भवति । उभाभ्यामप्याभ्यां व्युत्पत्तिभ्यां शब्दस्य प्राथम्यं सिद्धयति । यतो हि वर्णनं शब्देन भवति, अथ च 'कवते' इत्यत्रापि शब्दं करोतीत्यर्थो भवति । इदं सर्वमालोच्य **पण्डितराजः— रमणीयार्थप्रतिपादकः शब्दः काव्यम्** इति काव्यलक्षणं करोति । काव्यं शृणोति, काव्यमुच्चैः पठति, काव्यं मन्दं पठति, काव्यं श्रुतम् अर्थो न ज्ञातः, अर्थपठनश्रवणादीनां कर्मकोटौ सहजतया शब्द एव सिद्धो भवति । एतावता शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तिः सिद्धा । व्यवहारः शब्दमात्रेऽपि लक्षणया

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपपादयितुं न शक्या। यतो हि काव्यशब्दस्य शब्दार्थयुगले शक्तिः स्यात्, तच्छक्तिग्राहकं किमपि प्रमाणं नास्ति। यावत्कालं शब्दार्थयोः शक्तिः काव्यशब्दस्य न गृहीता भवेत् तावत् मुख्यार्थाबाधादिकं लक्षणासाधनं कथं तत्र प्रमितं भवेत्। यदि च उच्यते **मम्मटादिभिः शब्दार्थौ काव्यम्** इत्युक्तमस्ति, तदेवाधारीकृत्य मुख्यार्थबाधादिकं निर्णीय लक्षणा संगमनीया। एवं काव्यं श्रुतम् इत्यादीनि उदाहरणानि शब्दमात्रपर्यवसितानि भवेयुः। तत्रोच्यते यद् विमतवाक्यं तु अश्रद्धेयमेव।

इत्थं च काव्यशब्दस्य शब्दार्थयुगलशक्तिग्राहकप्रमाणाभावात् काव्यं श्रुतम् इत्यादिव्यवहारात् शब्दविशेषे सिद्ध्यन्तीं शक्तिं को नाम निवारयितुं क्षमः। यदि च **शब्दार्थौ काव्यम्** इत्यङ्गीक्रियते तदा तत्र प्रश्न उदेति यत् शब्दार्थौ काव्ये व्यासज्यवृत्या भवतः प्रत्येकपर्याप्त्या वा ? व्यासज्यवृत्या तु न वक्तुं शक्यते। यतो हि तथाङ्गीकारे श्लोकवाक्यं काव्यम् इति व्यवहारो न स्यात्। यथा द्वित्वसंख्याविनिर्मितये द्वयोरेकयोः व्यासज्यवृत्याऽपेक्षा भवति। अत एव एकस्मिन् द्वाविति व्यवहारो न भवति। एवमेव श्लोकवाक्यम् इति कथनेन शब्दस्यैव बोधो भवति। यदि काव्यपरं शब्दार्थयोर्व्यासक्तं, तदाऽयं व्यवहारः अनुपपन्नः स्यात्। प्रत्येकपर्याप्तिपक्षस्वीकारोऽपि नोपपपद्यते। तथा स्वीकारे एकस्मिन् काव्ये काव्यद्वयव्यवहारापत्तिः। अतः **शब्दः काव्यम्** इत्येव पक्षः साधीयान् इति **पण्डितराजाशयः**।

काव्यलक्षणप्रस्तावे **पण्डितराजेन** एकं परिष्कारं निर्माय तदीया शब्दवृत्तिता साधिता। तद्यथा—

'इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्, यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकताऽवच्छेदकं तत्त्वम्, स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितम्।'

रसगंगाधरे पृ० ११

पाण्डितराजेन काव्यलक्षणविमर्शप्रस्तावे यादृश्यो युक्तयो दत्ता यावांश्च गभीरो विचारः कृतो न तथाऽन्यत्र लभ्यते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काव्यभेदः

काव्यभेदप्रस्तावेऽप्यस्ति **पण्डितराजस्य** प्रातिभं वैलक्षण्यम् ।

तेन काव्यस्य चत्वारो भेदा मन्यन्ते । यथोक्तं तेन—

तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा

—रसगङ्गाधरे पृ० ३३

(१) उत्तमोत्तमम्

(२) उत्तमम्

(३) मध्यमम्

(४) अधमम् ।

अस्य भेदस्याभिधानान्येवमपि क्रियन्ते—

(१) आद्यम्

(२) द्वितीयम्

(३) तृतीयम्

(४) चतुर्थम् ।

काव्यभेदनिरूपणे व्यङ्ग्यार्थस्य नितरां महत्त्वम् । यथोक्तं ध्वनिकृता—

व्यङ्ग्यार्थस्य प्राधान्ये ध्वनिसंज्ञितः काव्यप्रकारः । गुणभावे तु गुणीभूत-व्यङ्ग्यम् । ततोऽन्यद्रसभावादितात्पर्यरहितव्यङ्ग्यार्थप्रकाशनशक्तिशून्यञ्च काव्यं केवलवाच्यवाचकवैचित्र्यमात्राश्रये रसोपनिबद्धमालेख्यप्रख्यं यदा भासते तच्चित्रम् । न तन्मुख्यं काव्यम् । काव्यानुकारो हि सः । तत् किञ्चिच्छब्दचित्रं यथा दुष्करयमकादि । वाच्यचित्रं ततः शब्दचित्रादन्यत् व्यङ्क्यार्थसंस्पर्शरहितं प्राधान्येन व्यङ्ग्यार्थतया स्थितं रसादितात्पर्यरहितमुत्प्रेक्षादिकम् । ध्वन्यालोके पृ० ४९४ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आचार्यमम्मटस्य काव्यभेदविधानं ध्वन्यालोकस्यैनमेव सङ्केतमाधारीकृत्य विदितमिव विद्यते।

पण्डितराजस्त्रयाणां भेदानां स्थाने चतुरो भेदान् करोति। तन्मते ध्वनिकाव्यमुत्तमोत्तमं भवति। गुणीभूतं काव्यम् उत्तमम्, अर्थचित्रं मध्यमम्, शब्दचित्रम् अधमम्।

चत्वारोऽपि भेदाः निजनिर्मितोदाहरणै रमणीयतरैर्लक्षणैः परिष्कृताः सन्ति। प्रतीयते **पण्डितराजः** पञ्चभेदान् चिकीर्षति स्म। अत एव तृतीयं काव्यं मध्यमं मनुते।

चुतर्षुभेदेषु तृतीयस्य मध्यमत्वं न सिद्ध्यति। अत एव पञ्चमोऽधमाधमो नाम काव्यप्रकारः आसीद्विवक्षितः। यथोक्तं **पण्डितराजेन**—

यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत् पञ्चममधमाधममपि काव्यविधासु गणयितुमुचितम्। यथैकाक्षार-पद्यार्थावृत्तियमक-पद्मबन्धादि।

समादधाति—

तथाऽपि रमणीयार्थप्रतिपादकशब्दतारूप-काव्यसामान्यलक्षणानाक्रान्ततया वस्तुतः काव्यत्वाभावेन, महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम्, वस्तुस्थितिरेवानुरोध्यत्वात्। रसगंगाधरे पृ० ७३

ये च त्रीन् भेदान् मन्यन्ते, तेषां मते गुणीभूतव्यंग्यस्य द्वितीयकाव्यस्य मध्यमत्वं सर्वथोपपद्यते। अथ च पञ्चसु भेदेषु स्वीकृतेषु तृतीयस्य मध्यमत्वं विवक्षितमासीत्। किन्तु पर्यन्ते मनसि सन्नप्ययं भेदः सामान्यलक्षणानाक्रान्तत्वात् न परिगणितः। बन्धादिकाव्यं काव्यत्वेन व्यह्रियते। वर्णविन्यासमूला चमत्कृतिः तत्रापि भवति। तथाविधे काव्ये चतुर्थकाव्यापेक्षयापि व्यंग्यार्थविलीनता अधिका भवति। इदं काव्यं तु नास्ति, किन्तु काव्यानुकारस्तु कल्पनीय एव भवति। एवं भेदव्यवस्थायामपि **पण्डितराजेन** नवीना कापि कल्पना उद्भाविता।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भेदानां लक्षणोदाहरणवैशिष्ट्यम्

पण्डितराजेन ध्वनिकाव्यस्य कृते उत्तमोत्तमकाव्यमिति संज्ञा दत्ता। एतेन ध्वनेर्वैशिष्ट्यं विशकलितं भवति।

आद्यकाव्यलक्षणप्रस्तावे **पण्डितराजो** लक्षयति —शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थं व्यङ्क्तस्तदाद्यम्।

यस्मिन् काव्ये वाचकः वाच्यश्च व्यंग्यार्थापेक्षयाऽप्रधानीकृतस्वरूपौ चमत्कारातिशयसम्पन्नं सहृदयग्राह्यं प्रधानीभूतमर्थम् अभिव्यङ्क्तः व्यंजनया वृत्त्या बोधयतः, तत्र उत्तमोत्तमं काव्यं भवति। अस्योदाहरणमस्ति—

शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते॥

अत्रालम्बनस्य नायकस्य, सविधशयनाक्षिप्तस्य रहःस्थानादेरुद्दीपनस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य, औत्सुक्यादेश्च व्यभिचारिणः संयोगाद् रतिरभिव्यज्यते।

रसगंगाधरे, पृ० ३४-३५

अत्र त्रपायाः मुख्यत्वं रतेर्वेति विमर्शे **पण्डितराजप्रतिभाप्रकर्षो** दृश्यते। त्रपायाः कार्यं विद्यते दरमीलननयनात्वम्, रतेः कार्यं विद्यते निरीक्षणम्। यदि प्राधान्यं त्रपायाः स्यात्, तदा 'निरीक्षते' इत्यंशस्य वैयर्थ्यापत्तिः। अतो रतेरेव प्राधान्यमिति **पण्डितराजेन** साधितम्। अस्योदाहरणस्यैकमपरमपि वैलक्षण्यं, येन च साहित्यशास्त्रीयविश्लेषणपरम्परायामेको नूतनालोचनामृतनिष्यन्दः समासादितो भवति। शृङ्गारस्य द्वौ पक्षौ। एकः संयोगः, अपरश्च विप्रयोगः। सामान्यत इदं बुद्ध्यते यत् अनुरागिणोरैकाधिकरण्यं संयोगः, अथ च तयोर्वैयधिकरण्यं विप्रयोगः। परन्त्वेषा धारणा पण्डितराजेन प्रत्याख्यायते। स एवं मनुते यदनुरागिणोश्चित्तयोर्योगः संयोगः, अथ च चित्तयोर्वियोगः विप्रलम्भः। यथा अत्रैव सविधे शयितापि दयिता मनोरथान् सफलीकर्तुमसमर्था सती दयितस्य आननाम्बुजमीषन्नयननिमीलनपूर्वकं निरीक्षते। अत्रैकाधिकरण्येऽपि चित्तयोर्योगो नास्ति। नायकपक्षतः काचन चेष्टा नात्र

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दर्शिता। नायिका च निजसंकल्पपूर्णे सर्वथाऽसमर्था। एवंविधेऽपि सन्निधाने विप्रलम्भसाधना पण्डितराजप्रतिभावैशिष्ट्यम्।

अत्र व्यभिचारिभावस्य वैशिष्ट्यम्, अथवा स्थायिभावस्य वैशिष्ट्यम् इत्याशङ्कायां स्थायिभाववैशिष्ट्यं युक्त्या संसाध्य पण्डितराजो व्यभिचारिभावस्यापि वैशिष्ट्यप्रदर्शनाय उदाहरणान्तरं प्रस्तौति—

गुरुमध्यगता मया नताङ्गी, निहता नीरजकोरकेण मन्दम्।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णिताऽऽसीत्।

रसगंगाधरे, पृ० ४०

अत्र घूर्णिताऽऽसीदित्यनेन अमर्षरूपस्य व्यभिचारिभावस्य प्राधान्यम्। पूर्वपद्ये व्यभिचारिभावस्य प्राधान्यं प्रतिपिपादयिषतां कृते इदमुदाहरणं प्रदत्तं, येन च सहृदया विदांकुर्वन्तु यत् व्यभिचारिभावप्राधान्ये काव्यं कीदृशं भवति।

ध्वनिकाव्ये गुणीभूतव्यंग्ये च भेदनिरूपणप्रकरणे **पण्डितराजस्य** महती सूक्ष्मता विलोक्यते। गुणीभूतव्यंग्यकाव्यस्य लक्षणं **पण्डितराजेन** कृतम्—

यत्र व्यंग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम्।

अर्थात् गुणीभूतव्यंग्यं काव्यम्। पण्डितराजदृशा इदमेवोत्तमम्। वाच्यापेक्षया प्राधानीभूतं व्यंग्यान्तरमादाय गुणीभूतं व्यंग्यमादाय अतिव्याप्तिवारणाय लक्षणे एवपदसन्निवेशः। सत्स्वप्यनेकेषु व्यंग्येषु अप्रधानीभूतेषु यदि किञ्चिदेकं व्यंग्यं वाच्यम्, अथ च व्यंग्यान्तरमतिशेते तदा तस्य ध्वनित्वमेव भवति। अस्योदाहरणम्—

राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय॥

रसगंगाधरे पृ० ६३

अत्र जानकीकुशलम् आवेदयति हनूमान्, तेन राघवः शिशिरीक्रियते। सह्याचलः शीतलः, किन्तु राघवविरहज्वालया उष्णतां गतः। तत्र कपयः सुखं शेरते।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विरहव्यथायां जानकीकुशलबोधेन जाते नैयून्ये पर्वतः शिशिरो जातः। कुशलबोधको वर्तते हनूमान् इति शीतार्ताः कपयस्तस्मै कुप्यन्ति।

अत्र जानकीकुशलावेदनेन राघवः शिशिरीकृत इति व्यंग्यार्थः हनूमद्विषयककोपोपपादकः। असौ हि व्यंग्यार्थः दास्यमनुभवद् राजकलत्रमिव वाच्यार्थचमत्कृतिं समेधयति। अत एव अत्र गुणीभूतं व्यंग्यं नाम द्वितीयं काव्यम्।

अस्मादुदाहरणात्पूर्वम् उत्तमोत्तमकाव्यस्यैकमुदाहरणं प्रदत्तमस्ति—

तल्पगतापि च सुतनुः श्वासासङ्गं न या सेहे।
हृदयगतमपि प्रियपाणिं मन्दमाक्षिपति॥

या नववधूः पल्यङ्कशयिता पत्युः श्वासस्याप्यासङ्गं न सहते, सा प्रियपाणिं मन्दमाक्षिपति। अत्र मान्द्यरूपवाच्यार्थस्य उपपत्तये व्यंग्यार्थयोजनाकरणीयैव भवति। नायिका वेत्ति यत् सा प्रवत्स्यत्पतिका भवित्री। यत एषा प्रस्थानपूर्वरजनी। मान्द्ये हेतुताऽस्ति प्रवत्स्यत्पतिकात्वस्य। तच्च प्रवतत्स्यत्पतिकात्वं व्यग्यंम्। अतः अस्य व्यंग्यार्थस्यापि वाच्यार्थोपपादकत्वम्। अतः अत्रापि गुणीभूतव्यंग्यत्वम्। कथं ध्वनिकाव्यस्येदमुदाहरणं भवितुमर्हति? तत्र **पण्डितराजेन** समाहितम्—

इदं मान्द्यम् अनुदिनसख्युपदेशादिभिरनतिचमत्कारिभिरप्युपपादयितुं शक्यते। किन्तु निवेचनीयमिदमस्ति यत् सख्युपदेशादिकृतमिदं मान्द्यमस्ति, अथवा प्रवत्स्यत्पतिकात्वमूलम्। तदा प्रामुख्यं भवति प्रवत्स्यत्पतिकात्वस्य। तदेव परनिर्वृतिचर्वणागोचरतामासादयति। तेन च विप्रलम्भरतेः प्रकाशनं भवति।

ध्वनिकाव्ये गुणीभूतव्यंग्यकाव्ये च व्यंग्यार्थस्य प्राधान्याप्राधान्याभ्यामस्ति प्रथमद्वितीयकाव्ययोः कश्चिद् सहृदयवेद्यो विशेषः।

अप्पयदीक्षितव्याख्यानप्रत्याख्यानवैचित्र्यम्

निःशेषच्युतचन्दनेति पद्यव्याख्यानप्रसङ्गे एवकारघटितं यद् व्याख्यानं **चित्रमीमांसायां** कृतं तस्य प्रत्याख्यानेन व्यञ्जनावादिनां कश्चित् पक्षविशेषो दृढतरो भवति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निःशेषेति पद्ये सर्वाणि विशेषणानि भोगे एव पर्यवसितानि न तु स्नाने इति व्याहरतो दीक्षितस्य खण्डनप्रस्तावे पद्यमिदं भोगे स्नाने च सविधि व्याख्याय वैयञ्जनिकं पन्थानं महता कौशलेन समुद्भासयति ।

वाच्यातिशायिनो व्यङ्ग्यस्यायमेव भावो यद् काव्यार्थो वाच्ये व्यङ्ग्ये च समानतया सङ्घटते । अतिशयत्वानतिशयत्वं चमत्कृतिदृशा सङ्घटितं भवति ।

एकमर्थं सर्वथा पिधाय अर्थान्तरे सङ्घटनमालङ्कारिकसरणिं विरुणद्धि । ध्वनिकाव्यस्य नितरां प्रथितपद्यव्याख्याने **पण्डितराज**विश्लेषणरीतिर्नवतां समुन्मीलयति ।

तृतीयकाव्यं वाच्यचित्रं मध्यमं भवति ।

यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम् ।

अत्र वाच्यचमत्काराच्छादितो व्यङ्ग्यचमत्कारो भवति । अर्थात् व्यङ्ग्यप्रतीतिजन्यश्चमत्कारो लेशतः सन्नपि सान्द्रतया प्रसृमरस्य वाच्यप्रतीतिजन्यचमत्कारस्य तेजस्वितायामन्तर्निलीनो भवति । यथा **यमुनावर्णने**—

तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरत्याः सखी ।

अत्र **पण्डितराजस्य** गद्यबन्धकौशलं प्रेक्षितुं शक्यते । पर्वतानां पक्षच्छेदोद्यतेन्द्रभिया हिमालयतनयो मैनाकः सागरजठरे क्वचिन्निलीन इति ।

अत्र गङ्गायां हिमगिरिभुजत्वसम्भावना उत्प्रेक्षाविच्छित्तिबीजम् । अस्यां वाक्ययोजनायां गङ्गास्रोतसः श्वैत्यं, पातालतलचुम्बित्वमपि व्यज्यते । किन्तु इदं व्यंग्यसौन्दर्यम् उत्प्रेक्षाऽविच्छित्या समाच्छादितमिति गद्येऽस्मिन् तृतीयकाव्यता । एतत्कृते **पण्डितराजेनोच्यते** नागरिकेतरनायिकाकल्पितकाश्मीरद्रवाङ्गरागनिगीर्णोनिजाङ्गगौरिमेव प्रतीयते । अर्थात् काचिद् गौरी ग्राम्यवधूः सान्द्रं काश्मीरद्रवाङ्गरागं लिम्पति मुखाद्यङ्गेषु । तेन च तदीयो गौरिमा समाच्छादितो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भवत्यङ्गरागेण। एवमेवात्र अलंकारचमत्कारेण व्यंग्यचमत्कृतिराच्छादिता। स्वातन्त्र्येणात्मनो वैशिष्ट्यं न प्रकाशयितुं विवशीकृता।

चतुर्थं काव्यम्— **यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं, तदधमं चतुर्थम्।**

अस्मिन् काव्ये वाच्यार्थप्रतीतिसमुद्भूतश्चमत्कारः पुष्णाति शब्दप्रतीतिजन्यं चमत्कारम्। यथा—

मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः॥

(रसगंगाधरे पृ. ७२)

अत्र कश्चिद् भक्तः भगवन्तं स्तौति। मित्रः सूर्यः अत्रिपुत्रश्चन्द्रः, तौ नेत्रे स्तः यस्य तस्मै मित्रात्रिपुत्रनेत्राय। त्रयी वेदाः तया सह ये दानवादयः शात्रवशत्रुतां कुर्वन्ति, तेषां शत्रवे भगवते वेदशत्रुनाशकाय इत्यर्थः। गोत्रं पर्वतः, तस्य अरिः पक्षच्छेदनात् शत्रुः इन्द्रः, तस्य गोत्रे जाताः देवाः तेषां रक्षकाय गोत्रात्रे धरित्रीरक्षकाय भूयो भूयो नमस्कृतिः। अत्र अर्थमूलापि चमत्कृतिर्विद्यते, किन्तु कविप्रतिभासंरम्भगोचरता शब्दयोजनायाम्। अत एवात्र चतुर्थकाव्यता।

पण्डितराजेन पञ्चमकाव्यस्यापि कल्पना कृता। एवं तत्र अरुचिरपि प्रदर्शिता। यथोक्तं तेन—

यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत् पञ्चममधमाधममपि काव्यविधासु गणयितुमुचितम्। यथैकाक्षर-पद्यार्थावृत्तियमकपद्मबन्धादि।

तथापि रमणीयार्थप्रतिपादकशब्दतारूपकाव्यसामान्यलक्षणानाक्रान्ततया वस्तुतः काव्यत्वाभावेन, महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्भणितम्, वस्तुस्थितेरेवानुरोध्यत्वात्।

रसगंगाधरे पृ० ७३

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काव्यानां भेदनिरूपणप्रस्तावे पण्डितराजस्य वर्तते काऽपि सूक्ष्मेक्षिका। यथोक्तं तेन यद् गुणीभूतव्यङ्ग्ये काव्ये व्यङ्ग्यं दास्यमनुभवद्राजकलत्रमिव भवति। अर्थचित्रे व्यङ्ग्यार्थः नागरिकेतरनायिकाकल्पितकश्मीरद्रवाङ्गरागनिगीर्णगौरिमेव भवति। तेन जागरूकव्यङ्ग्यस्य अजागरूकव्यङ्ग्यस्यापि कल्पना काव्यभेदस्पष्टीकरणाय कृता। पञ्चमभेदः तन्मनसि वर्तते प्रतिष्ठिता, किन्तु रमणीयार्थप्रतिपादकत्वाभावात् अयं भेदः प्रतिष्ठितो न भवति। स शब्दचित्रम्, अर्थचित्रम् उभयविधमपि काव्यं नाधमं मनुते। यतो हि तत्र चमत्कृतेर्भेदः विद्यत एव। अतस्तेन अर्थचित्रे मध्यमत्वं, शब्दचित्रे अधमत्वं च परिकल्पितम्।

रसः

रसविषये **पण्डितराजेन** एकादशमतानि दर्शितानि। तत्रादाव**भिनवगुप्तस्या**भिव्यक्तिवादः, **भट्टनायकस्य** *भुक्तिवादः,* बोधस्फीतया वाचा व्याख्यातौ। **आचार्य- मम्मटेन** च अनयोर्मते दर्शिते। **पण्डितराजेन** च स्वीयेन विधिना मधुस्यन्दिन्या शैल्या एषामाचार्याणामाशयः प्रदर्शितः। नव्यास्तु परे तु, एके, अपरे तु— इति प्रतीकैरपि केचन सिद्धान्ताः पुरस्कृताः। पुनश्च विभावादयस्त्रयः समुदिताःरसाः इति कतिपये। त्रिषु य एव चमत्कारी, स एव रसः, एषु यदि कश्चिदपि न चमत्कारकारी, तदा कोऽपि न रसः इति बहवः भाव्यमानो विभाव एव रस इत्यन्ये, व्यभिचारि एव, तथा तथा परिणमति इति केचित्। एवम् एकादशमतानि व्याख्यातानि।

शान्तो रसो, भक्तिः रसः न वा? यद्यस्ति तर्हि कथं तदुपपादनं—इत्यादिकं **पण्डितराजेन** महत्या प्रतिभया उपपादितम्। विप्रलम्भस्य पञ्चविधत्वम्, वीररसस्य दानदयायुद्धधर्मभेदात् चतुर्विधत्वम्, तेषां चमत्कारप्रोतान्युदाहरणानि, व्यभिचारिभावानां मधुरतराणि लक्षणानि, पण्डितराजप्रज्ञायाः सूक्ष्मत्वं व्यञ्जयन्ति। एवं गुणानां लक्षणान्युदाहरणानि तथा च माधुर्यौजःप्रसादानां द्रुतिदीप्तिविकासमूलतोपपादन-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मपि नवदृष्टिव्यंजकम्। भावध्वनेः विवेचनमपि नितरां रमणीयम्। **पण्डितराजेन** रसादेर्ध्वनेरपि संलक्ष्यक्रमता उपपादिता।

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि गणयामास पार्वती॥

—इति पद्ये प्रसंगोऽयं विशकलितः।

अत्र केचिद् वदन्ति विभावादीनामलक्ष्यनुमतयैव व्यज्यमानो रत्यादिस्थायीभावः रसतामेति। यतो हि रतिभावो नाम झटिति जायमाना लौकिकचमत्कारविषयस्थायित्वम्। संलक्ष्यक्रमतया व्यज्यमानरत्यादेस्तु वस्तुमात्रतैव। एवं **पण्डितराजेन रसगंगाधरस्य** प्रथमानने नवोन्मेषशालिनां चिन्तनानां विच्छित्तिभाजां काव्यानां प्रस्तुतिः सहृदयप्रीतये प्रास्तावि।

रसगङ्गाधरस्य द्वितीयानने ध्वनिभेदाः शब्दवृत्तयस्तथाचालङ्कारा निरूपिता अलङ्कारेषूपमाया निरूपणं महता संरम्भेण कृतम्। उपमालक्षणम्, उपमाभेदाः, उपमापदं, शाब्दबोधः, उपमादोषाः, उपमेयोपमा, अनन्वयः, असमः, उदाहरणम्, स्मरणम्, रूपकम्, तत्र स्थलविशेषेषु शाब्दबोधाः, परिणामः, ससन्देहः, भ्रान्तिमान् उल्लेखः, अपह्नुतिः, उत्प्रेक्षा, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, सहोक्तिः, विनोक्तिः, समासोक्तिः, पर्यायोक्तिः, व्याजस्तुतिः, आक्षेपः, विरोधः, विभावना, विशेषोक्तिः, असङ्गतिः, विषमः, समः, विचित्रम्, अधिकम्, अन्योऽन्यम्, विशेषः, व्याघातः, कारणमाला, एकावली, सारः, काव्यलिङ्गम्, अर्थान्तरन्यासः, अनुमानम्, यथासंख्यम्, पर्य्यायः, परिवृत्तिः, परिसंख्या, अर्थापत्तिः, विकल्पः, समुच्चयः, समाधिः, प्रत्यनीकम्, प्रतीपम्, प्रौढोक्तिः, ललितम्, प्रहर्षणम्, विषादजम्, उल्लासः, अवज्ञा, तिरस्कारः, लेशः, तद्गुणः, अतद्गुणः, मीलितम्, सामान्यम् अथ च उत्तरम् इत्यलङ्कारसन्दर्भाः नवत्वप्रचुरास्तैस्तैर्नवोदाहरणरत्नैः सन्ति परिमण्डिताः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्याः पण्डितराजकृतयः

रसगङ्गाधरातिरिक्ता अपि काश्चन तत्कृतय इह संक्षेपतो विव्रियन्ते ।

(१) **गङ्गालहरी** —गङ्गास्तुतिमूला

(२) **अमृतलहरी** —यमुनास्तवप्रवणा

(३) **लक्ष्मीलहरी** —लक्ष्मीस्तवमयी

(४) **सुधालहरी** —सूर्यस्तोत्ररूपा

(५) **यमुनावर्णनम्** —इदं गद्यकाव्यम् । केचन वदन्ति यदत्र कानिचित् पद्यान्यप्यासन्, तदा चम्पूः भवेत् ।

(६)**आसफविलासः**—आसफखानजीवनमधिकृत्य रचितः, असफखानः शाहजहांश्वसुरः ।

(७) **जगदाभरणम्**

(८) **प्राणाभरणम्** ।

(९) **भामिनीविलासः** ।

(१०) **चित्रमीमांसाखण्डनम्**

(११) **मनोरमाकुचमर्दनम्**

Bhawan's Sri ... Sanskrit Mahavidyalaya 518

एवं गद्यपद्यचम्पूकाव्यानि पण्डितराजप्रणीतानि संस्कृतसाहित्याकाशे प्रदीप्तनक्षत्राणीव विराजन्ते ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रिय संस्कृत संस्थान
56-57; इन्स्टिट्यूशनल एरिया, पंखा रोड,
जनकपुरी, नई दिल्ली-110058